# .. ma NgalAShTakam ..

## ॥ मङ्गलाष्टकम् ॥

### Document Information

Text title : maNgalAShTakam

File name : maNgalAShTakam.itx

Category : aShTaka

Location : doc_deities_misc

Language : Sanskrit

Subject : philosophy/hinduism/religion

Transliterated by : PSA Easwaran psaeaswaran at gmail.com

Proofread by : PSA Easwaran psaeaswaran at gmail.com

Description-comments : Devi book stall, Kodumgallur, Kerala

Source : Sthothra Rathnaakaram, edited by N. Bappuravu, 2010

Latest update : August 6, 2016

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 6, 2016

sanskritdocuments.org

# ॥ मङ्गलाष्टकम् ॥

ब्रह्माविष्णुर्गिरीशः सुरपतिरनलः प्रेतराड्यातुनाथ-
स्तोयाधीशश्च वायुर्धनदगुहगणेशार्कचन्द्राश्च रुद्राः ।
विश्वादित्याश्विसध्या वसुपितृमरुतस्सिद्धविद्याश्च यक्षा
गन्धर्वाः किन्नराद्याखिलगगनचरा मङ्गलं मे दिशन्तु ॥ १॥

वाणी लक्ष्मी धरित्री हिमगिरितनया चण्डिका भद्रकाली
ब्रह्माद्या मातृसङ्घा अदितिदितिसतीत्यादयो दक्षपुत्र्यः ।
सावित्री जह्नुकन्या दिनकरतनयारुन्धती देवपत्न्यः
पौलोमाद्यास्तथान्याः खचरयुवतयो मङ्गलं मे दिशन्तु ॥ २॥

मत्स्यः कूर्मो वराहो नृहरिरथ वटुर्भार्गवो रामचन्द्र-
स्सीरी कृष्णश्च खड्गी सकपिलनरनारायणात्रेयवैद्याः ।
अन्ये नानावताराः नरकविजयिनश्चक्रमुख्यायुधानि
तत्पत्न्यस्तत्सुताश्चाप्यखिलहरिकुला मङ्गलं मे दिशन्तु ॥ ३॥

विश्वामित्रो वसिष्ठः कलशभव उतथ्योऽङ्गिराः काश्यपश्च
व्यासः कण्वो मरीची क्रतुभृगुपुलहा शौनकोऽत्रिः पुलस्त्यः ।
अन्ये सर्वे मुनीन्द्राः कुजबुधगुरुशुक्रार्कजाद्या ग्रहा ये
नक्षत्राणि प्रजेशाः फणिगणमनवो मङ्गलं मे दिशन्तु ॥ ४॥

ताक्ष्योऽनन्तो हनूमान् बलिरपि सनकाद्याः शुको नारदश्च
प्रह्लादः पाण्डुपुत्रा नृगनलनहुषाः विष्णुरातोऽम्बरीषः ।
भीष्माक्रूरोद्धवोशीनरभरतहरिश्चन्द्ररुक्माङ्गदाद्याः
अन्ये सर्वे नरेन्द्रा रविशशिकुलजा मङ्गलं मे दिशन्तु ॥ ५॥

आकूत्याद्याश्च तिस्रः सकलमुनिकलत्राणि दारा मनूनां
तारा कुन्ती च पाञ्चाल्यथ नलदयिता रुक्मिणी सत्यभामा ।
देवक्याद्याश्च सर्वा यदुकुलवनिता राजभार्यास्तथान्याः
गोप्यश्चारित्रयुक्ताः सकलयुवतयो मङ्गलं मे दिशन्तु ॥ ६॥

विप्रा गावश्च वेदाः स्मृतिरपि तुलसी सर्वतीर्थानि विद्याः
नानाशास्त्रेतिहासा अपि सकलपुराणानि वर्णाश्रमाश्च ।
साङ्ख्यं ज्ञानं च योगावपि यमनियमौ सर्वकर्माणि कालाः

सर्वे धर्माश्च सत्याद्यवयवसहिता मङ्गलं मे दिशन्तु ॥ ७॥

लोका द्वीपाः समुद्राः क्षितिधरपतयो मेरुकैलासमुख्याः
कावेरीनर्मदाद्याः शुभजलसरितः स्वर्द्रुमा दिग्गजेन्द्राः ।
मेघा ज्योतींषिनानानरमृगपक्ष्यादयः प्राणिनोऽन्ये
सर्वौषध्यश्च वृक्षाः सकलतृणलता मङ्गलं मे दिशन्तु ॥ ८॥

भक्त्या संयुक्तचित्ताः प्रतिदिवसमिमान् मङ्गलस्तोत्रमुख्यान्
अष्टौ श्लोकान् प्रभाते दिवसपरिणतौ ये च मर्त्याः पठन्ति ।
ते नित्यं पूर्णकामा इह भुवि सुखिनश्चार्थवन्तोऽपि भूत्वा
निर्मुक्ता सर्वपापैर्वयसि च चरमे विष्णुलोकं प्रयान्ति ॥ ९॥

इति मङ्गलाष्टकस्तोत्रं समाप्तम् ॥

Proofread by PSA Easwaran psaeaswaran at gmail.com

.. ma NgalAShTakam ..
was typeset on August 6, 2016

Please send corrections to sanskrit@cheerful.com